Topic 77 क्विन् आदि प्रत्ययान्त हलन्त पुँल्लिंग शब्द

त्यदादिषु दृशोऽनालोचने कञ्च।
त्यदादिषूपपदेषु अज्ञानार्थाद् दृशेः कञ्, चात् क्विन्।

आ सर्वनाम्नः।
सर्वनाम्न आकारोऽन्तादेशः स्याद् दृग्-दृश-वतुषु। तादृक्, तादृग्। तादृशौ। तादृशः। तादृग्भ्याम्।

'व्रश्च' - इति षः। जश्त्वचर्त्वे - विट्, विड्। विशौ। विशः। विड्भ्याम्।

नशेर्वा।
नशेः कवर्गोऽन्तादेशो वा पदान्ते। नक्, नग्, नट्, नड्। नशौ। नशः। नग्भ्याम्, नड्भ्याम्।

स्पृशोऽनुदके क्विन्।
अनुदके सुप्युपपदे स्पृशेः क्विन्। घृतस्पृक्, घृतस्पृग्। घृतस्पृशौ। घृतस्पृशः।

दधृक्, दधृग्। दधृषौ। दधृषः। दधृग्भ्याम्। रत्नमुट्, रत्नमुड्। रत्नमुषौ। रत्नमुड्भ्याम्। षट्, षड्। षड्भिः। षड्भ्यः। षण्णाम्, षट्सु। रुत्वं प्रति षत्वस्यासिद्धत्वात्

सजुषो रुः इति रुत्वम्

वोरुपधाया दीर्घ इकः।

रेफवान्तयोरुपधाया इको दीर्घः पदान्ते।
पिपठीः पिपठिषौ। पिपठीर्भ्याम्।

नुम्-विसर्जनीय-शर्-व्यवायेऽपि।

एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य
सस्य मूर्धन्यादेशः। ष्टुत्वेन पूर्वस्य षः-
पिपठीष्षु। पिपठीःषु।

चिकीः। चिकीर्षौ। चिकीर्भ्याम्।
चिकीर्षु। विद्वान्। विद्वांसौ। हे विद्वन्।

वसोः सम्प्रसारणम्।

वस्वन्तस्य भस्य सम्प्रसारणं स्यात्। विदुषः
'वसुस्रंसु-०' इति दः- विद्वद्भ्याम्।

वसुप्रत्ययान्त भसञ्ज्ञक अङ्ग के स्थान
पर सम्प्रसारण होता है। शस् से लेकर अजादि
विभक्तियों के परे रहते भसंज्ञा होती है। अतः उन
सब अजादि विभक्तियों में सम्प्रसारण होगा।
य, व, र, ल के स्थान पर प्रयुज्यमान इ, उ,
ऋ, लृ को सम्प्रसारण कहते हैं। उदाहरण के लिए
विद्वस् + अस् में 'विद्वस्' वसुप्रत्ययान्त भसञ्ज्ञक
अङ्ग है। अतः प्रकृत सूत्र से उसके द्वितीय वकार
को उकार सम्प्रसारण होकर 'विदु अस्' रूप
बनता है। इस अवस्था में सम्प्रसारणाच्च सूत्र
से पूर्वरूप तथा फिर प्रत्यय के सकार को
षकार करने से ...